दीप्तोपलैः मंडणयाद्यन्त्रं भूधरनामकम् ।”

इति भूधरयन्त्रम् ।

“यन्त्रं डमरुसंज्ञं स्यात्तत् स्थाल्योर्मुद्रिते मुखे ।”

इति डमरुयन्त्रम् । इति भावप्रकाशः ॥ (तथाच ।

“अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा ।
सैव छिद्रान्विता मध्ये गम्भीरामारणोचिता ।”

इति अन्धमूषायन्त्रम् ।

“द्वौ भागौ तु सदुग्धस्य एकावल्मीकमृत्तिका ।
लोहकिट्टस्य भागैकं श्वेतपाषाणभागिकम् ॥
नरकेशसमं किञ्चित् छागीदुग्धेन पेषयेत् ।
माषद्वयं दृढ़ं मर्द्द्य तेन मूषां सुसम्पुटाम् ॥
शोषयित्वा रसं क्षिप्त्वा तत्कल्कैः सन्धि लेपयेत् ।
रौद्रमूषा समाख्याता सम्यक्पारदसाधिका ।”

इति मूषायन्त्रम् । * ।

“वालुकापूरितं भाण्डं तन्मध्ये सूतकं क्षिपेत् ।
रसं मूषागतञ्चैव भाण्डं सावेन रोधयेत् ॥
लिप्त्वा मृल्लवणैः सन्धिं पाचयेच्चुल्लिकाग्निना ।
वालुकायन्त्रमेतद्धि योजयेद्रसकर्म्मणि ।”

इति वालुकायन्त्रम् ॥

“तिर्य्यक्कण्ठं काचकुप्या गिलयेत् स्वल्पभाण्डकैः ।
तिर्य्यक्कृत्वा पचेत् भाण्डं वकयन्त्रमिति स्मृतम् ।”

इति वकयन्त्रम् ॥

“ऊर्द्धाधः संपुटाकारं तन्मध्ये रससंस्थितम् ।
कवचीयन्त्रमेतद्धि रसादिद्रव्यसाधनम् ।”

इति कवचीयन्त्रम् ॥*॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणाद्यधिकारे ॥ चिकित्सोपयग्यपरयन्त्रविवृतिर्यथा,—

“यन्त्रशतमेकोत्तरमत्र हस्तमेव प्रधानतमं यन्त्राणामवगच्छ । किं कारणम् । यस्माद्धस्ताद्दते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद्यन्त्रकर्म्मणाम् । तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि । तानि षट्प्रकाराणि । तद्यथा । स्वस्तिकयन्त्राणि । सन्दंशयन्त्राणि । तालयन्त्राणि । नाड़ीयन्त्राणि । शलाकायन्त्राणि । उपयन्त्राणि चेति ॥

तत्र चतुर्व्विंशतिः स्वस्तिकयन्त्राणि । द्वे सन्दंशयन्त्रे । द्वे एव तालयन्त्रे । विंशतिर्नाड्यः । अष्टाविंशतिः शलाकाः । पञ्चविंशतिरुपयन्त्राणि । तानि प्रायशो लौहानि भवन्ति तत्प्रतिरूपकाणि वा तदलाभे । तत्र नानाप्रकाराणां व्यालानां मृगपक्षिणां मुखैर्मुखानि यन्त्राणां प्रायशः सदृशानि तस्मात् तत्सारूप्यादागमादुपदेशादन्ययन्त्रदर्शनाद्युक्तितश्च कारयेत् । समाहितानि यन्त्राणि खरश्लक्ष्णमुखानि च । सुदृढानि सुरूपाणि सुग्रहाणि च कारयेत् ।

तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंहव्याघ्रवृकतरक्ष्वृक्षद्वीपिमार्ज्जारशृगालमृगैर्व्वारुककाककङ्कुररचासभासशशघातुलूकचिल्लिश्येनगृध्रक्रौञ्चभृङ्गराजाञ्जलिकर्णावभञ्जननन्दिमुखमुखानि मसूराकृतिभिः कीलैरवबद्धानि मूलेऽङ्कुशवदावृत्तवारङ्गाण्यस्थिविदष्टशल्योद्धरणार्थमुपदिश्यन्ते ॥*॥सनिग्रहो-ऽनिग्रहश्च सन्दंशौ षोड़शाङ्गुलौ भवतस्त्वग्मांससिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते ।

तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालद्वितालके कर्णनासानाड़ीशल्यानामाहरणार्थम् ।

नाड़ीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकर्य्यार्थञ्चेति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च ।

भगन्दरार्शोऽर्ब्बुदव्रणवस्त्यन्तरवस्तिमूत्रवृद्धिदकोदरधूमनिरुद्धप्रकशसन्निरुद्धगुदयन्त्राण्यलावुघटीयन्त्राणि चोपरिष्टाद्वक्ष्यामः ।

शलाकायन्त्राण्यपि नानाप्रकाराणि नानाप्रयोजनानि यथायोगपरिणाहदीर्घाणि च तेषां गण्डूपदशरपुङ्खसर्पफणावड़िशमुखे द्वे द्वे एषणव्यूहनचालनाहरणार्थमुपदिश्येते । मसूरदलमात्रमुखे द्वे किञ्चिदानताग्रे स्रोतोगतशल्योद्धरणार्थम् । षट्कार्पासकृतोष्णीषाणि प्रमार्ज्जनक्रियासु । त्रीणि दर्व्वाकृतीनि खल्लमुखानि क्षारौषधप्रणिधानार्थम् । त्रीण्यन्यानि जाम्बववदनानि त्रीण्यङ्कुशवदनानि षड़ग्निकर्म्मस्वभिप्रेतानि । नासार्व्वुदहरणार्थमेकं कोलास्थिदलमात्रमुखं स्वक्षतीक्ष्णोष्ठम् । अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रम् । मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पवृन्ताग्रप्रमाणपरिमण्डलमिति ।

उपयन्त्राण्यपि रज्जुवेणिकापट्टचर्म्मान्तवल्कललतावस्त्राष्ठीलाश्म-मुद्गर-पाणिपाद-तलाङ्गुलि-जिह्वा-दन्तनखमुख-वालाश्वकटकशाखाष्ठीवन-प्रवाहणहर्षायस्कान्तमयानि क्षाराग्निभेषजानि चेति ।

एतानि देहे सर्व्वस्मिन् देहस्यावयवे तथा ।
सन्धौ कोष्ठे धमन्याञ्च यथायोगं प्रयोजयेत् ॥

यन्त्रकर्म्माणि तु निर्घातनपूरणबन्धनव्यूहनवर्त्तनचालनविवर्त्तनविवरणपीड़नमार्गविशोधनविकर्षणाहरणाञ्चनोन्नमनविनमनभञ्जनोन्मथनाचूषणैषणदारणर्ज्जूकरणप्रक्षालनप्रधमनप्रमार्ज्जनानि चतुर्व्विंशतिः ॥

स्वबुद्ध्या चापि विभजेद्यन्त्रकर्म्माणि बुद्धिमान् ।
असंख्येयविकल्पत्वाच्छल्यानामिति निश्चयः ॥

तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राहि विषमग्राहि वक्रं शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाशमिति द्वादश यन्त्रदोषाः ।

एतैर्दोषैर्विनिर्म्मुक्तं यन्त्रमष्टादशाङ्गुलम् ।
प्रशस्तं भिषजा ज्ञेयं तद्धि कर्म्मसु योजयेत् ॥
दृश्यं सिंहमुखाद्यैस्तु गूढ़ं कङ्कमुखादिभिः ।
निर्हरेत्तु शनैः शल्यं शस्त्रयुक्तिव्यपेक्षया ।

विवर्त्तते साध्ववगाहते च
शल्यं निगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वविकारि चैव ।”

इति सुश्रुते सूत्रस्थाने सप्तमेऽध्याये ॥*॥

गोलाध्यायोक्तयन्त्राणि यथा,—

“अथ यन्त्राध्यायो व्याख्यायते । तत्रादौ तदारम्भप्रयोजनमाह ।

दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः ।
वक्ष्ये यन्त्राणि ततः स्फुटानि संक्षेपतः कतिचित् ॥
गोलो नाड़ीवलयं यष्टिः शङ्कुर्घटी चक्रम् ।
चापं तुर्य्यं फलकं धीरेकं पारमार्थिकं यन्त्रम् ।”

“अथ प्रथमं गोलयन्त्रमाह ।

अपवृत्तनगरविचिह्नं क्षितिजे धृत्वा कुजेन संसक्ते ।
नाड़ीवृत्ते विन्दुं कृत्वा धृत्वाथ जलसमं क्षितिजम् ॥
रविचिह्नस्य च्छाया पतति कुमध्ये यथा तथा विधृते ।
उडुगोले कुजविन्द्वोर्मध्ये नाड्यो द्युयाताः स्युः ।”

“अथ नाड़ीवलयमाह ।

अपवृत्ते कुजलग्ने लग्नं चापो खगोलनलिकान्तः ।
भूस्थं ध्रुवयष्टिस्थं चक्रं षष्ट्या निजोदयैश्चाङ्कम् ॥
यस्तैर्यष्टीभायासुदयेऽर्कं न्यस्य नाड़िका ज्ञेयाः ।
इष्टच्छायाग्रान्तरेऽथ लग्नं प्रभायाश्च ॥
केनचिदाधारेण ध्रुवाभिमुखकीलकेऽत्र धृते ।
अथवा कीलच्छायातलमध्ये स्युर्नता नाड्यः ।”

घटिकायन्त्रलक्षणादिकं घटीयन्त्रशब्दे द्रष्टव्यम् ।

“अथ शङ्कुमाह । [शङ्कुः ।

समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः
तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥

इति शङ्कुयन्त्रम् ॥

अथ चक्रमाह ।

चक्रं चक्रांशाङ्कं परिधौ श्लथश्टङ्खलादिकाधारम् ।
धात्री त्रिभ आधारात् कल्प्या भार्द्धेऽत्र खार्द्धेष ॥
तन्मध्ये सूक्ष्माक्षं क्षिप्त्वार्काभिमुखनेमिकं धार्य्यम् ।
भूमेरुन्नतभागास्तत्राक्षच्छायया भुक्तः ॥
तत्खार्द्धान्तश्च नता उन्नतलवसंगुणीकृतं द्युदलम् ।
द्युदलोन्नतांशभक्तं नाड्यः स्थूलाः परैः प्रोक्ताः ।”

“अथ वेधेन ग्रहज्ञानमाह ।

“चैत्रादिपुष्यान्तिमवारुणानामुच्चादयं नेमिगतं यथा स्यात् ।
दूरेऽन्तरेऽप्युभखेचरौ वा
तयात्र यन्त्रं सुधिया प्रधार्य्यम् ॥
नेमिस्थदृष्ट्याक्षगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्य च योगताराम् ।
नेम्यङ्कयोरक्षयुजोस्तु मध्ये
येंऽशाः स्थिता भध्रुवको युतस्तैः ।
प्रत्यक् स्थिते भेऽथ पुरःस्थिते तैर्हीनो ध्रुवः स्यात् खचरस्य भुक्तम् ।”

“अथ चापं तुर्य्यगोलं चाह ।

दलीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तुर्य्यगोलम् ।”